# Shri Shivashankara Stotram or Yamabhaya Nivarana Stotram

# શ્રીશિવશઙ્કરસ્તોત્રમ્ અથવા યમભયનિવારણસ્તોત્રમ્

## Document Information

Text title : shivashankarastotra

File name : shivashankarastotra.itx

Category : shiva, stotra

Location : doc_shiva

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Verses 1, 13-16 are considered shivachAmarastutiH

Latest update : December 31, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2021

*sanskritdocuments.org*

# શ્રીશિવશઙ્કરસ્તોત્રમ્ અથવા યમભયનિવારણસ્તોત્રમ્

અતિભીષણકટુભાષણયમકિઙ્કિરપટલી
    કૃતતાડનપરિપીડનમરણાગમસમયે ।
ઉમયા સહ મમ ચેતસિ યમશાસન નિવસન્
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૧॥

અસદિન્દ્રિયવિષયોદયસુખસાત્કૃતસુકૃતેઃ
    પરદૂષણપરિમોક્ષણકૃતપાતકવિકૃતેઃ ।
શમનાનનભવકાનનનિરતેર્ભવ શરણં
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૨॥

વિષયાભિધબડિશાયુધપિશિતાયિતસુખતો
    મકરાયિતમતિસન્તતિકૃતસાહસવિપદમ્ ।
પરમાલય પરિપાલય પરિતાપિતમનિશં
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૩॥

દયિતા મમ દુહિતા મમ જનની મમ જનકો
    મમ કલ્પિતમતિસન્તતિમરુભૂમિષુ નિરતમ્ ।
ગિરિજાસુખ જનિતાસુખ વસતિં કુરુ સુખિનં
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૪॥

જનિનાશન મૃતિમોચન શિવપૂજનનિરતેઃ
    અભિતો દૃશમિદમીદૃશમહમાવહ ઇતિ હા ।
ગજકચ્છપ જનિતશ્રમ વિમલીકુરુ સુમતિં
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૫॥

ત્વયિ તિષ્ઠતિ સકલસ્થિતિકરુણાત્મનિ હૃદયે
    વસુમાર્ગણ કૃપણેક્ષણ મનસા શિવ વિમુખમ્ ।
અકૃતાહ્નિકમસુપોષકમવતાત્ ગિરિસુતયા
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૬॥

પિતરાવિતિ સુખદાવિતિ શિશુના કૃતહૃદયૌ
    શિવયા સહ ભયકે હૃદિ જનિતં તવ સુકૃતમ્ ।
ઇતિ મે શિવ હૃદયં ભવ ભવતાત્તવ દયયા
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૭॥

શરણાગતભરણાશ્રિત કરુણામૃતજલધે
    શરણં તવ ચરણૌ શિવ મમ સંસૃતિવસતેઃ ।
પરિચિન્મય જગદામયભિષજે નતિરાવતાત્
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૮॥

વિવિધાધિભિરતિભીતિરકૃતાધિકસુકૃતં
    શતકોટિષુ નરકાદિષુ હતપાતકવિવશમ્ ।
મૃડ મામવ સુકૃતીભવ શિવયા સહ કૃપયા
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૯॥

કલિનાશન ગરલાશન કમલાસનવિનુત
    કમલાપતિનયનાર્ચિતકરુણાકૃતિચરણ ।
કરુણાકર મુનિસેવિત ભવસાગરહરણ
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૧૦॥

વિજિતેન્દ્રિય વિબુધાર્ચિત વિમલામ્બુજચરણ
    ભવનાશન ભયનાશનભજિતાઙ્ગિતહૃદય ।
ફણિભૂષણ મુનિવેષણ મદનાન્તક શરણં
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૧૧॥

ત્રિપુરાન્તક ત્રિદશેશ્વર ત્રિગુણાત્મક શમ્ભો
    વૃષવાહન વિષદૂષણ પતિતોદ્ધર શરણમ્ ।
કનકાસન કનકામ્બર કલિનાશન શરણં
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૧૨॥

॥ ઇતિ શ્રીશિવશઙ્કરસ્તોત્રમ્ અથવા યમભયનિવારણસ્તોત્રમ્ ॥

There are four more verses found in kShamApana stotram in Shri Vatuk Puja Vidhi book of Paramananda Research Institute. The verses are qualitatively similar and are added here for

completion.

અતિદુર્નય ચટુલેન્દ્રિય રિપુ સઞ્ચય દલિતે
    પવિ કર્કશ કટુ જલ્પિત ખલગર્હણ ચલિતે ।
શિવયા સહ મમચેતસિ શશિશેખર નિવસન્
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૧૩॥

ભવભઞ્જન સુરરઞ્જન ખલવઞ્ચન પુરહન્
    દનુજાન્તક મદનાન્તક રવિજાન્તક ભગવન્ ।
ગિરિજાવર કરુણાકર પરમેશ્વર ભયહન્
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૧૪॥

શક્રશાસન ક્રતુશાસન ચતુરાશ્રમ વિષયે
    કલિ વિગ્રહભવદુર્ગ્રહરિપુદુર્બલ સમયે ।
દ્વિજ ક્ષત્રિય વનિતાશિશુદર કમ્પિત હૃદયે
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૧૫॥

ભવ સમ્ભવ વિવિધામય પરિપીડિત વપુષં
    દયિતાત્મજ મમતાભર કલુષીકૃત હૃદયમ્ ।
કુરુ માં નિજ ચરણાર્ચન નિરતં ભવ સતતમ્
    શિવશઙ્કર શિવશઙ્કર હર મે હર દુરિતમ્ ॥ ૧૬॥

The verses 1, 13-16 are termed as shivachAmarastutiH in some documents.

Some prints call this shivAShTakam as well.

Encoded and proofread by Sunder Hattangadi

*Shri Shivashankara Stotram or Yamabhaya Nivarana Stotram*

pdf was typeset on December 28, 2021

Please send corrections to *sanskrit@cheerful.com*